# तृतीयः घट्टः



# *लिङ्गबोधः (जेंडर इति)*

## *शिक्षकाणां कृते*

लिङ्गबोधः अथवा जेंडर इति कश्चित् एतादृशः शब्दः अस्ति यं प्रायः भवन्तः सर्वे शृण्वन्ति । प्रायः अयं सरलतया स्पष्टः न भवति । इत्थं प्रतिभाति यत् एतस्य अस्माकं जीवने विशिष्टा प्रवृत्तिः हस्तक्षेपः वा नास्ति तथा च वयं प्रशिक्षण-कार्यक्रमेषु एव एतस्य चर्चाः शृणुमः। वास्तविकतायां तु वयं सर्वे स्वजीवने प्रतिदिनम् एव एतस्य सत्यस्य अनुभवं कुर्मः । एतत् निर्धारयति यत् वयं के स्मः अपि च के भवितुं शक्नुमः तथा च वयं कुत्र गन्तुं शक्नुमः, कुत्र च गन्तुं न शक्नुमः । जीवनस्य बहुविधाः विकल्पाः अस्माकं कृते अन्ततः एतेन आधारेण एव निश्चिताः भवन्ति । लिङ्गबोधस्य अथवा जेंडर इत्यस्य अस्माकं ज्ञानम् अस्माकं परिवारेण समाजेन एव जायते । इदम् अस्मान् तस्यां दिशि चिन्तयितुं प्रेरयति यत् वयं स्व-परिवेशे महिलाः पुरुषान् च यान् भूमिकायाः निर्वहणं कुर्वतः पश्यामः ताः भूमिकाः स्वाभाविक्यः पूर्वनिर्धारिताः च सन्ति । यथार्थरूपेण एतानि कर्तव्यानि सम्पूर्णे विश्वे विभिन्नानां समुदायानां कृते पृथक्-पृथक् भवन्ति । अतः लिङ्गबोधतः अस्माकम् अभिप्रायः तेभ्यः अनेकेभ्यः सामाजिक-मूल्येभ्यः तथा च रूढिवादिधारणाभ्यः अस्ति, याः अस्माकं संस्कृत्या अस्माकं स्त्रीलिङ्ग-भवनस्य पुँल्लिङ्ग-भवनस्य च जैविकेन अन्तरेण सह योजितः अस्ति । अयं शब्दः अस्माकं बहूनाम् असमानतानां स्त्रीपुरुषयोः मध्ये शक्तिसम्बन्धान् अपि ज्ञातुं साहाय्यं करोति ।

अग्रिमौ द्वौ अध्यायौ अस्माकं समाजस्य लैङ्गिकसङ्कल्पनाः एतस्य शब्दस्य प्रयोगं विना अस्माकं पुरतः स्थापयतः । एतत् समीचीनं स्यात् यत् विद्यार्थिनः एतस्य विषयस्य कृते प्रोत्साहनीयाः यत् विभिन्न-शैक्षणिक-पद्धतयः यथा कथानां प्रस्तुतिः विशिष्टेषु अध्ययनेषु चर्चाः, कक्ष्यायां गतिविधयः, तथ्यानां व्याख्यानं तथा च चित्राणां समीक्षायाः माध्यमेन ते स्वजीवनस्य स्वपार्श्वस्थस्य समाजस्य च विषये विचारं कुर्युः अपि च प्रश्नान् कुर्युः। जेंडर इति शब्दे आगते सति प्रायः कयाचित् विशेषदृष्ट्या जनाः एतम् अपूर्णम् अर्थम् अपि कुर्वन्ति यत् अयं शब्दः केवलं महिलाभिः बालिकाभिः च सम्बद्धः अस्ति । अतः एतेषु अध्यायेषु एतस्य तथ्यस्य अपि विषये जागरूकता धृता अस्ति यत् केवलं बालिकाः एव न अपितु बालकाः अपि चर्चायां सहभागिनः भवेयुः ।

चतुर्थे अध्याये विशिष्टे द्वे अध्ययने सम्मिलिते, ये पृथक् समयैः स्थानैः च सम्बद्धे स्तः तथा च अस्माकं पुरतः इदं तथ्यं प्रस्तुतं यत् बालकाः बालिकाः च कथं वयस्काः भवन्ति अपि च तेषां सामाजिकभिन्नता कथं रूपं धरति । एतानि उदाहरणानि छात्राणां कृते एतत् ज्ञातुं साहाय्यं करिष्यन्ति यत् सामाजीकरणं सर्वत्र समानं नास्ति । तत् समाजतः निर्धारितं भवति तथा च एतस्मिन् यथाकालं निरन्तरं परिवर्तनं चलति । एते अध्यायाः अस्मान् इदम् अपि बोधयन्ति यत् कथं समाजे स्त्रीपुरुषयोः कृते विभिन्नानि मूल्यानि निर्धार्यन्ते तथा च इतः एव भेदस्य असमानतायाः च प्रारम्भः भवति । केनचित् चित्रित-कथा-पट्टेन बालकाः गृहस्य सम्पूर्णेषु कार्येषु चर्चां करिष्यन्ति यानि मुख्यतः महिलाभिः क्रियन्ते । ते चर्चां करिष्यन्ति यत् कथं गृहेषु महिलाभिः कृतकार्यं कार्यस्य श्रेण्याम् एव गण्यते अथवा पुनः तत् अर्थहीनम् इति मन्यते ।

पञ्चमः अध्यायः कार्यस्य क्षेत्रे लिङ्ग-आधारिते भेदभावे केन्द्रितः अस्ति तथा च समानतायाः कृते महिलानां कृतसङ्घर्षम् अपि प्रस्तौति । कक्ष्यायाः गतिविधिषु बालाः कार्याणि व्यवसायान् च आधारीकृत्य समाजे प्रचलितानां रूढिवादिमान्यतानां विषये प्रश्नान् प्रष्टुम् आरप्स्यन्ति । अस्मिन् अध्याये एतस्मिन् विषये अपि सङ्केताः प्राप्स्यन्ते यत् कथं बालकानां बालिकानां च कृते शिक्षासदृशाः अवसराः समानरूपेण उपलब्धाः न सन्ति । एकोनविंशति-विंशत्योः शताब्द्योः द्वयोः महिलयोः जीवनस्य कथासु बालाः द्रक्ष्यन्ति यत् एतासां स्त्रीणां कृते मुक्तेः सङ्घर्षः कथं प्रारब्धः तथा च लेखने पाठने च शिक्षणेन तेषां जीवनं कथं परिवर्तितम् । महान्ति परिवर्तनानि प्रायेण सामूहिक-सङ्घर्षैः एव भवन्ति । अस्य अध्यायस्य अन्ते कश्चित् चित्रनिबन्धः अस्ति यः स्त्री-आन्दोलनेन परिवर्तनार्थम् प्रयुक्तानां नीतीनाम् उदाहरणानि प्रस्तौति ।

# चतुर्थः अध्यायः



## बालकानां बालिकानां च रूपेण विकासः

बालकजन्म बालिकाजन्म वा कस्यापि कश्चित् महत्त्वपूर्णः परिचयः अस्ति तस्य अस्मिता वर्तते। यस्मिन् समाजे अस्माकं विकासः भवति सः अस्मान् शिक्षयति यत् बालकानां बालिकानां च कीदृशः व्यवहारः स्वीकर्तव्यः अस्ति । तैः किं करणीयं भवति तथा च किं न कर्तव्यं भवति। वयं प्रायेण इत्थं चिन्तयन्तः एव वृद्धिं गच्छामः यत् एते विषयाः प्रायः सर्वत्र समानाः एव सन्ति । परन्तु किं सर्वेषु समाजेषु बालकान् बालिकाः च प्रति समानः दृष्टिकोणः अस्ति ? अस्मिन् पाठे वयम् एतस्य एव प्रश्नस्य उत्तरं ज्ञातुं प्रयत्नं करिष्यामः। वयम् एतदपि द्रक्ष्यामः यत् बालकानां बालिकानां च कृते दीयमानानि पृथक्-पृथक् दायित्वानि तान् भविष्यत्कालिकस्य स्त्रीपुरुषयोः दायित्वस्य कृते सज्जीकरोति। अस्मिन् पाठे वयं द्रक्ष्यामः यत् अधिकांशसमाजाः स्त्रीपुरुषाणां कृते पृथक्तया महत्त्वं यच्छन्ति। स्त्रियः यासां कर्तव्यानां निर्वहणं कुर्वन्ति तासां दायित्वानां कृते पुरुषैः निरूह्यमाणानां दायित्वानां कार्याणां च अपेक्षया अल्पमहत्त्वं दीयते । अस्मिन् पाठे वयम् एतत् अपि द्रक्ष्यामः यत् स्त्रीपुरुषयोः मध्ये कार्यस्य क्षेत्रे असमानताः कथं विकसन्ति।

## *1920 तमे दशके सामोवा-द्वीपे बालानां विकासः*

सामोवा-द्वीपं प्रशान्तमहासागरस्य दक्षिणे स्थितानां लघुद्वीपसमूहानां कश्चित् भागः अस्ति । सामोवानसमाजम् आधृत्य कृतानुसन्धानस्य आख्यानुसारं 1920 तमे दशके बालाः विद्यालयं न गच्छन्ति स्म । ते वरिष्ठबालकेभ्यः वयस्केभ्यः च बहुविधविषयान् शिक्षन्ते स्म यथा कनिष्ठबालानां पालनं निरीक्षणं अपि च गृहकार्यं कथं करणीयं भवति इत्यादिविषये शिक्षन्ते स्म । द्वीपेषु मत्स्यग्रहणं किञ्चित् महत्त्वपूर्णं कार्यम् आसीत् अतः किशोराः बालकाः मत्स्यग्रहणाय सुदूरयात्राः प्रति गमनं शिक्षन्ते स्म । परन्तु एतान् विषयान् ते स्वबाल्यस्य पृथक्-पृथक्-काले शिक्षन्ते स्म ।



*सप्तम-कक्ष्यायाः कश्चित् सामोवा-च्छात्रः स्वविद्यालयीये वेशे वर्तते ।*

लघुबालकाः यदा गमनस्य प्रारम्भं कुर्वन्ति स्म तेषां मातरः अथवा वरिष्ठाः जनाः तेषां संरक्षणस्य कार्यं त्यजन्ति स्म । एतत् दायित्वं ज्येष्ठ-बालकानां भवति स्म ये प्रायः स्वयम् अपि पञ्चवर्षीयाः भवन्ति स्म । बालकाः बालिकाः च स्वस्य लघुभ्रातॄणां भगिनीनां च निरीक्षणं कुर्वन्ति स्म परन्तु यदा कश्चित् बालकः प्रायः नववर्षीयः भवति स्म तदा वरिष्ठबालकानां समूहे सम्मिलितः भवति स्म तथा च बाह्यानि कार्याणि शिक्षते स्म यथा मत्स्यग्रहणं नारिकेलवृक्षाणां रोपणं च । बालिकाः यावत्पर्यन्तं त्रयोदशवर्षीयाः चतुर्दशवर्षीयाः वा न भवन्ति तावत्पर्यन्तं ताः लघुबालकानां संरक्षणं तथा च ज्येष्ठानां लघूनि लघूनि कार्याणि कुर्वन्ति स्म । प्रायः चतुर्दशवर्षाणां वयसः अनन्तरं ताः अपि मत्स्यग्रहणार्थं गच्छन्ति स्म उद्यानेषु कार्यं कुर्वन्ति स्म तथा च वेणुपात्राणां निर्माणं शिक्षन्ते स्म । भोजनपाकस्य कार्यं पृथङ्-निर्मितासु पाकशालासु एव भवति स्म यत्र बालकैः एव अधिकं कार्यं करणीयं भवति स्म तथा च बालिकाः तेषां साहाय्यं कुर्वन्ति स्म ।

*भवतां तरुणावस्थायाः अनुभवाः समोवा-देशस्य बालानां किशोराणां च अनुभवेभ्यः केन प्रकारेण भिन्नाः सन्ति ? एतेषु अनुभवेषु वर्णितः किं कश्चित् विषयः अस्ति यं भवन्तः स्वस्य वयस्कतायाः अनुभवेन सह संयोजितुम् इच्छन्ति ?*

## 1960 तमे दशके मध्यप्रदेशे पुरुषस्य रूपेण वृद्धिं प्रति गमनम्

निम्नलिखितालेखः 1960 तमे वर्षे मध्यप्रदेशस्य एकस्मिन् लघुनगरे वासस्य विषये तथा च विद्यालय-गमनस्य विषये कृत-वर्णनतः गृहीतः अस्ति।



*बालिकाः विद्यालयस्य गमनकाले समूहं निर्माय चलनं किमर्थं इच्छन्ति?*

*स्वप्रतिवेशस्य कस्याश्चित् वीथेः क्रीडा-उद्यानस्य वा चित्रं रचयतु । तस्मिन् लघुबालकैः लघुबालिकाभिः च क्रियामाणानां विभिन्नानां गतिविधीनां च अङ्कनं कुर्वन्तु ।*

*भवद्भिः रचिते चित्रे किं तावत्यः एव बालिकाः सन्ति यावन्तः बालकाः सन्ति ? सम्भवतः भवद्भिः बालिकानां सङ्ख्या न्यूना दर्शिता स्यात् । किं भवन्तः तानि कारणानि ज्ञापयितुं शक्नुवन्ति यतः भवतां प्रतिवेशे राजमार्गे उद्यानेषु विपणिषु च चिरं यावत् सायङ्काले अथवा रात्रौ स्त्रियः बालिकाः च विरलतया दृश्यन्ते?*

*किं बालकाः बालिकाः च भिन्नेषु भिन्नेषु कार्येषु संलग्नाः सन्ति ? किं भवन्तः विचार्य एतस्य कारणं वक्तुं शक्नुवन्ति ? यदि भवन्तः बालिकानां बालकानां च स्थानं परस्परं परिवर्तयिष्यन्ति अर्थात् बालिकानां स्थाने बालकान् तथा च बालकानां स्थाने बालिकाः स्थापयिष्यन्ति तदा किं भविष्यति ?*

षष्ठकक्ष्यायां प्राप्तेः अनन्तरं बालकाः बालिकाः च पृथक्-पृथक् विद्यालयेषु पठनार्थं गच्छन्ति स्म । बालिकानां विद्यालयाः बालकानां विद्यालयतः सर्वथा भिन्नप्रकारेण निर्मीयन्ते स्म । तेषां विद्यालयस्य मध्ये किञ्चित् क्रीडाङ्गणं भवति स्म, यत्र ते बाह्यसंसारतः सर्वथा पृथक् भूत्वा विद्यालयस्य सुरक्षायां क्रीडन्ति स्म । बालकानां विद्यालये एतादृशं क्रीडाङ्गणं न भवति स्म अपितु तेषां क्रीडाक्षेत्रं केवलं किञ्चित् बृहत् प्रथितं स्थानम् आसीत् यत् विद्यालयेन संलग्नम् आसीत् । प्रत्येकं सायङ्काले विद्यालयस्य अवकाशात् पश्चात् बालकाः शताधिकबालिकानां समूहं सङ्कीर्ण-वीथिभ्यः गच्छन्तं पश्यन्ति स्म । राजमार्गेषु गच्छन्त्यः एताः बालिकाः अतिगभीराः दृश्यन्ते स्म । एतत् तथ्यं बालकेभ्यः पृथक् आसीत् ये बालकाः राजमार्गान् अनेकेषां कार्याणां कृते प्रयुञ्जते स्म यथा एवमेव स्थित्वा रिक्तकालं यापयितुं धावनार्थं क्रीडार्थं द्विचक्रिका-चालनस्य कृते विविध-क्रिया-कलापान् कर्तुं च कुर्वन्ति स्म । बालिकानां कृते वीथिः केवलं गृहं गन्तुं काचित् माध्यमरूपा आसीत् । बालिकाः सदैव समूहेषु गच्छन्ति स्म । प्रायः कदाचित् तासां मनसि इदं भयम् आसीत् यत् कश्चित् ताभिः सह अनुचितं व्यवहारं न कुर्यात् अथवा आक्रमणं न कुर्यात् ।

उपर्युक्तयोः द्वयोः उदाहरणयोः पाठानन्तरं वयम् अनुभवामः यत् वयस्कभावस्य प्राप्तेः अपि अनेके उपायाः सन्ति । वयं प्रायः चिन्तयामः यत् बालकाः एकेन एव उपायेन ज्येष्ठत्वं प्राप्नुवन्ति । एतादृशम् एतदर्थम् अस्ति यतोहि वयं स्व-अनुभवैः एव आधिक्येन परिचिताः भवामः। यदि वयं स्वस्य परिवारस्य वृद्धैः सह वार्तालापं करिष्यामः तदा अनुभविष्यामः यत् तेषां बाल्यकालः प्रायः अस्माकं बाल्यकालस्य अपेक्षया सर्वथा भिन्नः आसीत् ।

वयम् इदम् अपि अनुभवामः यत् समाजः बालिकाबालकयोः मध्ये स्पष्टतया अन्तरं करोति । अयं भेदः अल्पायुषः एव प्रारभते। उदाहरणार्थं तेभ्यः क्रीडनार्थं पृथक् क्रीडनकानि दीयन्ते । बालकेभ्यः क्रीडनार्थं प्रायः कारयानानि दीयन्ते तथा च बालिकानां कृते पाञ्चालिकाः। द्वे अपि क्रीडनके क्रीडार्थम् आनन्ददायके भवितुं शक्नुतः पुनरपि बालिकानां कृते पाञ्चालिकाः बालकानां च कृते कारयानानि एव किमर्थं दीयन्ते ? क्रीडनकानि बालान् एतत् बोद्धुं माध्यमभूतानि जायन्ते यत् यदा ते वयस्काः भूत्वा स्त्रीरूपेण पुरुषरूपेण वा भविष्यन्ति तदा तेषां भविष्यं पृथक्-पृथक् भविष्यति । यदि वयं विचारयामः तर्हि इदम् अन्तरं प्रायः दैनन्दिनस्य लघुषु लघुषु विषयेषु कल्प्यते । बालिकाभिः कीदृशानि वस्त्राणि धरणीयानि बालकाः उद्याने काः काः क्रीडाः क्रीडेयुः बालिकाभिः निम्नस्वरेण वार्ताः करणीयाः तथा च बालकैः उच्चस्वरेण अथवा रौद्रस्वरेण वार्ता करणीया । एते सर्वे उपायाः बालकानां कृते एतत् बोधनार्थं सन्ति यत् ते यदा युवकाः युवतयः वा भविष्यन्ति तदा तेषां विशिष्टाः भूमिकाः भविष्यन्ति । भाविजीवने एतस्य प्रभावः अस्माकम् अध्ययनस्य विषयेषु अथवा व्यवसायस्य चयने अपि भवति ।

**“मम माता कार्यं न करोति”**






अधिकांश-समाजेषु येषु अस्माकं समाजः अपि सम्मिलितः अस्ति तत्र पुरुषाणां स्त्रीणां च दायित्वानां तेषां कार्याणां च यत् महत्त्वं वर्तते तत् सामान्यतया न अवगम्यते । पुरुषाणां महिलानां च सामर्थ्यं समानं न भवति । आगच्छन्तु पश्यामः यत् पुरुषैः महिलाभिः च कृतकार्येषु इयम् असमानता कथम् अस्ति ।

### *गृह्यकार्यस्य मूल्यम्*

हरमीतायाः परिवारः न अनुभवति स्म यत् जसप्रीता गृहसम्बन्धिनं यत् कार्यं करोति स्म तत् कार्यं वास्तविकतायां कार्यं न आसीत् । सम्पूर्णे संसारे गृह्यकार्यस्य दायित्वं स्त्रीणाम् एव भवति यथा निभालन-सम्बद्धं कार्यं परिवारस्य

विषये अवधानम्, विशेषतया शिशूनां वृद्धानां रुग्णानां च विषये अवधानम्। पुनरपि यथा अस्माभिः दृष्टं गृह्यकार्याणि महत्त्वपूर्णानि न इति जनानां मानसिकता अस्ति । इत्थं स्वीक्रियते यत् एतानि कार्याणि तु महिलानां स्वाभाविकानि कार्याणि सन्ति अतः तासां कृते धनदानस्य कापि आवश्यकता नास्ति । समाजः एतेषां कार्याणां कृते अधिकं महत्त्वं न ददाति।

## गृहकार्यकर्तृणां जीवनम्

उपर्युक्तकथायां केवलं हरमीतायाः माता एव गृह्यकार्याणि न करोति स्म। आधिक्येन कार्याणि मङ्गला करोति स्म या तेषां गृह्यकार्येषु साहाय्यार्थं नियोजिता आसीत् । बहुषु गृहेषु विशेषतया नगरेषु लघुनगरेषु च जनाः गृह्यकार्यार्थं नियोज्यन्ते । ते अधिकानि कार्याणि कुर्वन्ति सम्मार्जनम्,स्वच्छता, वस्त्रप्रक्षालनं, पात्रप्रक्षालनं, पाककार्यं, शिशूनां वृद्धानां च सम्भालनम् इत्यादिः। गृह्यकार्यार्थं प्रायः महिलाः भवन्ति । कदाचित् एतानि कार्याणि कर्तुं लघुबालकाः बालिकाः च अपि नियोज्यन्ते । गृह्यकार्यस्य अधिकं महत्त्वं नास्ति अतः एतेभ्यः पारिश्रमिकम् अपि न्यूनमात्रया एव दीयते। गृह्य-कार्यकर्तृणां दिनं प्रातः पञ्चवादनतः प्रारभ्य चिरं रात्रिं यावत् अपि चलति। कठिनपरिश्रम-करणानन्तरं प्रायः ये तान् वृत्तौ नियोजयन्ति ते तैः सह सम्मानजनकं व्यवहारं न कुर्वन्ति। देहल्यां सेविकारूपेण कार्यकर्त्री काचित् स्त्री मेलानी स्वानुभवस्य विषये अनेन प्रकारेण उक्तवती -



***मिलानी स्वपुत्र्या सह वर्तते***

*किं हरमीतायाः सोनाल्याः च एतत् कथनं सम्यक् आसीत् यत् हरमीतायाः माता कार्यं न करोति ?*

*किं भवन्तः चिन्तयन्ति यदि भवतां माता अथवा ते जनाः ये गृह्यकार्यं कुर्वन्ति कस्मिंश्चिद् दिने कार्यतः विरताः भवेयुः तर्हि किं भविष्यति?*

*भवन्तः एतादृशं किमर्थं चिन्तयन्ति यत् सामान्यतया पुरुषाः बालकाः च गृह्यकार्यं न कुर्वन्ति ? भवतां चिन्तनानुसारं तैः गृह्यकार्यं करणीयम् उत् न करणीयम्?*

"मम प्रथमं सेवाकार्यं एकस्मिन् धनाढ्ये परिवारे आसीत् यः त्रितलयुक्ते भवने निवसति स्म। महोदया विचित्रा महिला आसीत् या प्रत्येकं कार्यं कारयितुं क्रोशति स्म । मम कार्यं पाकशालायाः आसीत्। अपरे द्वे बालिके स्वच्छतायाः कार्यं कुरुतः स्म। अस्माकं कार्यदिवसः प्रातः पञ्चवादनतः प्रारभते स्म । प्रातराशे अस्मभ्यं चायं तेन सह च शुष्के द्वे रोटिके लभ्येते स्म । अस्माभिः तृतीया रोटिका कदापि न प्राप्ता। सायङ्काले यदा अहं भोजनं पचामि स्म तदा ते द्वे बालिके मत्तः इतोऽपि एकां रोटिकां याचेते स्म । अहं गुप्तरूपेण ताभ्याम् एकाम् एकां रोटिकां ददामि स्म तथा च स्वयम् अपि एकां रोटिकां स्वीकरोमि स्म । वयम् आदिनं कार्यं कृत्वा बुभुक्षया पीडिताः भवामः स्म। वयं गृहस्य आभ्यन्तरे पादरक्षायाः प्रयोगं न कर्तुं शक्नुमः स्म। शैत्यकाले अस्माकं पादेषु शोथः भवति स्म। अहं महोदयातः बिभेमि स्म परन्तु तस्यै अहं मनसि कुप्यामि स्म, अपि च आत्मानम् 'अहम् अपमानिता' इति अपि अनुभवामि स्म । किं वयम् आदिनं कार्यं न कुर्मः स्म ? किं वयं कस्यचित् सम्मानजनकस्य व्यवहारस्य योग्याः न आस्म ?"

*हरियाणाराज्ये तमिलनाडुराज्ये च स्त्रियः प्रतिसप्ताहं सम्पूर्णरूपेण कति होराः कार्यं कुर्वन्ति?*

*एतस्मिन् सम्बन्धे स्त्रिपुरुषयोः कियान् भेदः दृश्यते?*

वास्तविकतायां यत् वयं गृह्यकार्यं वदामः तस्मिन् अनेकानि कार्याणि सम्मिलितानि भवन्ति। एतेषु केषाञ्चित् कार्याणां कृते अधिकस्य शारीरिकश्रमस्य आवश्यकता भवति । ग्रामीणेषु नगरीयक्षेत्रेषु बालिकाभिः महिलाभिः च दूरात् जलम् आनेतव्यं भवति। ग्रामीणेषु क्षेत्रेषु स्त्रिभिः बालिकाभिः च शिरसा इन्धनकाष्ठस्य भारिपोटलिकाः वहनीयाः भवन्ति। वस्त्रप्रक्षालनस्य स्वच्छतायाः सम्मार्जनस्य भार-उत्थापनस्य च कार्येषु, नमनस्य, उत्थापनस्य, वस्तूनि स्वीकृत्य च चलनस्य, आवश्यकता भवति। बहूनि एतादृशानि कार्याणि येषु यथा पाककार्यस्य कृते चिरकालं यावत् उष्णचुल्लिकायाः पुरतः स्थातव्यं भवति। स्त्रियः यत् कार्यं कुर्वन्ति तत् कार्यं भारि श्रमसाध्यं तथा च शारीरिकं कार्यं भवति अपरञ्च वयं सामान्यतया चिन्तयामः यत् पुरुषाः एव एतादृशानि कार्याणि कर्तुं शक्नुवन्ति।

गृह्यकार्याणां तथा च निभालनस्य कार्याणां कश्चित् अन्यः पक्षः यस्य कृते वयं महत्त्वं न प्रयच्छामः, तत् अस्ति एतेषु कार्येषु व्यापृतः दीर्घः कालः। यथार्थरूपेण यदि वयं स्त्रिभिः क्रियामाणानि गृह्याभ्यान्तराणि तथा च बाह्यकार्याणि योजयामः गणयामः वा तर्हि वयं ज्ञास्यामः यत् आहत्य स्त्रियः पुरुषाणाम् अपेक्षया अधिकं कार्यं कुर्वन्ति।

निम्नतालिकायां भारतस्य केन्द्रियसाङ्ख्यिकीय-सङ्घटनेन कृतस्य विशिष्टस्य अध्ययनस्य केचन अङ्काः सन्ति(**1998-99**)| पश्यन्तु किं भवन्तः रिक्तस्थानानि पूरयितुं शक्नुवन्ति ?

| राज्यम् | स्त्रीणां वेतनसहितस्य कार्यस्य होराः(प्रति-सप्ताहम्) | स्त्रीणाम् अवैतनिक-गृह्य-कार्यस्य होराः (प्रति-सप्ताहम्) | स्त्रीणां सम्पूर्णाः कार्यहोराः | पुरुषाणां वेतनसहिताः कार्यहोराः (प्रतिसप्ताहम्) | पुरुषाणाम् वैतनिकाः गृह्यकार्यस्य होराः (प्रतिसप्ताहम्) | पुरुषाणां सम्पूर्णाः कार्यहोराः |
|---|---|---|---|---|---|---|
| हरियाणा | 23 | 30 | ? | 38 | 2 | ? |
| त मलनाडुः | 19 | 35 | ? | 40 | 4 | ? |

***महिलानां कार्यं समानता च***



*मध्यप्रदेशस्य एकस्मिन् ग्रामे आङ्गण-वाटिका-केन्द्रे शिशवः*

यथा अस्माभिः दृष्टं महिलानां गृह्यकार्याणां निभालनस्य च कार्याणां कृते अल्पमहत्त्वप्रदानं कस्यचित् एकस्य जनस्य अथवा परिवारस्य विषयः नास्ति। एषः स्त्रीणां पुरुषाणां च मध्ये असमानतायाः काचित् महत्याः सामाजिक-व्यवस्थायाः एव भागः अस्ति । अतः एतस्य समाधानार्थं यानि कार्याणि करणीयानि सन्ति तानि केवलं व्यक्तिगतस्तरे पारिवारिकस्तरे च न अपितु शासकीयस्तरे अपि भवितव्यानि । वयं जानीमः यत् यत् समानता अस्माकं संविधानस्य महत्त्वपूर्णः सिद्धान्तः अस्ति । संविधानं कथयति यत् स्त्रीपुरुषयोः आधारेण भेदभावः न कर्तुं शक्यते । परन्तु वास्तविकतायां लिङ्गभेदः कर्तुं शक्यते । सर्वकारः एतस्य कारणानि ज्ञातुं तथा च एतस्याः स्थितेः सकारात्मकं निवारणम् अन्वेष्टुं वचनबद्धः अस्ति । उदाहरणार्थं सर्वकारः जानाति यत् बालकानां निभालनं तथा च गृह्यकार्यस्य भारः महिलासु बालिकासु च आपतति । स्वाभाविकरूपेण एतस्य प्रभावः बालिकानां विद्यालय-गमन-कार्यक्रमे अपि आपतति । एतस्माद् एव निश्चयः जायते यत् किं महिलाः गृहात् बहिः कार्यं कर्तुं शक्ष्यन्ति अन्यच्च यदि करिष्यन्ति तर्हि कीदृशं कार्यम् अथवा कार्यक्षेत्रं चेष्यन्ति । सम्पूर्णस्य देशस्य बहुषु ग्रामेषु प्रशासनेन आङ्गणवाटिकाः बालवाटिकाः च उद्घाटिताः सन्ति । प्रशासनेन कश्चित् अधिनियमः निर्मितः अस्ति यस्य अनुसारं यदि कस्याञ्चित् संस्थायां महिलाकर्मचारिणां सङ्ख्या त्रिंशत्तः अधिका वर्तते तर्हि तत्र बालवाटिकायाः सुविधा दातव्या

***बह्व्यः स्त्रियः यथा कथायां सोनाल्याः माता तथा च हरियाणायाः तमिलनाडोः च महिलाः यासां सर्वेक्षणं कृतं ताः गृह्यकार्यं गृहाद् बहिः च अपि कार्यं कुर्वन्ति । एतत् प्रायः महिलानां कार्यस्य द्विगुणितभाररूपेण ज्ञायते ।***

भविष्यति । बालवाटिकायाः व्यवस्थातः अनेकाः महिलाः गृहाद् बहिः गत्वा कार्यकरणे सुविधाम् अनुभविष्यन्ति । एतेन बह्वीनां बालिकानां विद्यालयं प्रति गमनम् अपि सम्भवं भविष्यति ।

***किं भवन्तः चिन्तयन्ति एतत् चित्रं किं वक्तुं प्रयतते ?***




**एतत् भित्तिचित्रं बङ्गप्रान्तस्य केनचित् महिलासमूहेन रचितम् अस्ति । किम् एतत् आधारीकृत्य भवन्तः  किमपि शोभनम् उद्घोष-वाक्यं रचयितुं शक्नुवन्ति ?**



# अभ्यासः

*1 सह एव प्रदत्तेषु कानिचित् कथनानि विचारयन्तु तथा च ज्ञापयन्तु यत् तानि सत्यानि सन्ति अथवा असत्यानि ? स्वस्य उत्तरस्य समर्थने एकम् उदाहरणम् अपि लिखन्तु ।*

(क) सर्वेषु समुदायेषु समाजेषु च बालकानां बालिकानां च भूमिकानां विषये समानविचारधारा न भवति ।

(ख) अस्माकं समाजः जायमानेषु बालकेषु जायामानासु च बालिकासु स्वल्पमपि भेदभावं न करोति ।

(ग) ताः महिलाः याः गृहे एव तिष्ठन्ति बाह्यं कार्यं च न कुर्वन्ति ।

(घ) महिलाभिः कृतकार्याणि पुरुषैः कृतकार्याणाम् अपेक्षया हीनानि सन्ति इति अवगम्यते ।

*2 गृह्यकार्यम् अदृश्यं भवति अपि च तस्य किमपि मूल्यं न दातुं शक्यते । गृह्यकार्याणि शारीरिकरूपेण श्रमसाध्यानि भवन्ति तानि श्रान्तिं जनयन्ति । गृह्यकार्येषु अधिकः कालः नश्यति ।*

*स्वशब्देषु लिखन्तु यत् अदर्शनयोग्यानि शारीरिकरूपेण श्रान्तिजनकानि अपि च समयसाध्यानि इत्यादिभ्यः वाक्यांशेभ्यः भवन्तः किम् अवगच्छन्ति ? स्वगृहस्य महिलानां कार्यस्य आधारेण प्रत्येकं विषयं केनचित् उदाहरणेन ज्ञापयन्तु ।*

*3 एतादृशानां विशिष्ट-क्रीडनकानां सूचीं निर्मान्तु यैः बालकाः क्रीडन्ति अपि च तादृशानां विशिष्टानां क्रीडनकानाम् अपि सूचीं निर्मान्तु यैः केवलं बालिकाः एव क्रीडन्ति । यदि द्वयोः सूच्योः किञ्चित् अन्तरम् अस्ति तर्हि चिन्तयन्तु ज्ञापयन्तु च यत् एवं किमर्थम् अस्ति ? चिन्तयन्तु यत् किम् एतस्य सम्बन्धः एतेन तथ्येन अस्ति यत् कालक्रमेण वयस्कस्य रूपेण बालैः कस्याः भूमिकायाः निर्वहणं करणीयं भविष्यति ?*

*4 यदि भवतां गृहे अथवा प्रतिवेशे गृह्यकार्येषु साहाय्यकर्त्री काचित् महिला अस्ति तर्हि तया सह वार्तां कुर्वन्तु अपि च तस्याः विषये किञ्चित् इतोऽपि आधिक्येन अवगमनस्य प्रयासं कुर्वन्तु यत् तस्याः गृहे अन्ये के के जनाः सन्ति ? ते किं कुर्वन्ति ? तेषां गृहं कुत्र अस्ति ? ताः प्रतिदिनं कति होराः यावत् कार्यं कुर्वन्ति ? ताः कियत् अर्जनं कुर्वन्ति ? एतानि सर्वाणि विवरणानि सम्मेल्य एकां लघुकथां लिखन्तु ।*

## शब्दसङ्कलनम्

**अस्मिता (परिचयः) -** अयम् कश्चित् आत्मसत्तायाः अर्थात् स्व-अस्तित्वस्य अथवा स्व-अस्तित्वं प्रति जागरूकतायाः भावः अस्ति। एकस्य मनुष्यस्य अनेकाः अस्मिताः (परिचयाः) भवितुं शक्नुवन्ति। उदाहरणार्थम् - एका एव व्यक्तिः काचित् बालिका भगिनी तथा च सङ्गीतज्ञा इव अस्मिता (परिचिता) भवितुं शक्नोति।

**द्विगुणितभारः** – *एतस्य शाब्दिकः अर्थः अस्ति – द्विगुणितं भारः। सामान्यतः एतस्य शब्दस्य प्रयोगः महिलाभिः यानि कार्याणि क्रियन्ते तेषां कार्याणाम् अवगमनार्थं क्रियते। अयं शब्दः एतत् तथ्यं स्वीकरोति यत् महिलाः सामान्यरूपेण गृहस्य अन्तः तथा च गृहस्य बहिः द्विगुणितं कार्यभारं निर्वहन्ति।*
**पर्यवेक्षणम्** – *पर्यवेक्षणस्य अन्तर्गतम् अनेकानि कार्याणि गण्यन्ते यथा पर्यवेक्षणं, दर्शनं, लालनं, पालनम् इत्यादीनि । शारीरिककार्याणि अतिरिच्य एतस्मिन् गहन-भावनात्मक-पक्षाः अपि सम्मिलिताः सन्ति।*

अवमूल्यितः – *यदा कश्चित् स्वकार्यस्य कृते अपेक्षितां मान्यताम् अथवा स्वीकृतिं न प्राप्नोति तदा सः आत्मानम् अन्यैः अहम् अवमूल्यितः अस्मि इति अनुभवति । उदाहरणार्थं पश्यामः यदि कश्चन बालकः स्वमित्रस्य कृते चिरकालं यावत् चिन्तयित्वा अन्विष्य किञ्चित् उपहारं क्रीणाति तथा च तस्य मित्रं तत् दृष्ट्वा काम् अपि प्रतिक्रियां न कुर्यात् तस्मिन् समये तस्य मित्रम् आत्मानम् अहम् अवमूल्यितः इति अनुभवति।*